श्रीगणेश गकारसहस्रनामावली

॥ ॐ श्री महागणपतये नमः ॥

ॐ गणेश्वराय नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ गणाराध्याय नमः ।
ॐ गणप्रियाय नमः ।
ॐ गणनाथाय नमः । ५।
ॐ गणस्वामिने नमः ।
ॐ गणेशाय नमः ।
ॐ गणनायकाय नमः ।
ॐ गणमूर्तये नमः ।
ॐ गणपतये नमः । १०।
ॐ गणत्रात्रे नमः ।
ॐ गणंजयाय नमः ।
ॐ गणपाय नमः ।
ॐ गणक्रीडाय नमः ।
ॐ गणदेवाय नमः । १५।
ॐ गणाधिपाय नमः ।
ॐ गणज्येष्ठाय नमः ।
ॐ गणश्रेष्ठाय नमः ।
ॐ गणप्रेष्ठाय नमः ।
ॐ गणाधिराजाय नमः । २०।
ॐ गणराजे नमः ।
ॐ गणगोप्त्रे नमः ।
ॐ गणाङ्गाय नमः ।
ॐ गणदैवताय नमः ।
ॐ गणबंधवे नमः । २५।
ॐ गणसुहृदे नमः ।
ॐ गणाधीशाय नमः ।
ॐ गणप्रदाय नमः ।
ॐ गणप्रियसखाय नमः ।
ॐ गणप्रियसुहृदे नमः । ३०।
ॐ गणप्रियरतोनित्याय नमः ।
ॐ गणप्रीतिविवर्धनाय नमः ।
ॐ गणमण्डलमध्यस्थाय नमः ।
ॐ गणकेलिपरायणाय नमः ।
ॐ गणाग्रण्ये नमः । ३५।
ॐ गणेशाय नमः ।
ॐ गणगीताय नमः ।
ॐ गणोच्छ्रयाय नमः ।
ॐ गण्याय नमः ।
ॐ गणहिताय नमः । ४०।
ॐ गर्जद्गणसेनाय नमः ।
ॐ गणोद्यताय नमः ।
ॐ गणप्रीतिप्रमतनाय नमः ।
ॐ गणप्रीत्यपहारकाय नमः ।
ॐ गणनार्हाय नमः । ४५।
ॐ गणप्रौढाय नमः ।
ॐ गणभर्त्रे नमः ।
ॐ गणप्रभवे नमः ।
ॐ गणसेनाय नमः ।
ॐ गणचराय नमः । ५०।
ॐ गणप्राज्ञाय नमः ।
ॐ गणैकराजे नमः ।
ॐ गणाव्ययाय नमः ।
ॐ गण्यनाम्ने नमः ।
ॐ गणपालनतत्पराय नमः । ५५।
ॐ गणजिते नमः ।
ॐ गणगर्भस्थाय नमः ।
ॐ गणप्रवणमानसाय नमः ।

ॐ गणगर्वपरिहर्त्रे नमः ।
ॐ गणाय नमः । ६०।
ॐ गणनमस्कृते नमः ।
ॐ गणार्चितांघ्रियुगलाय नमः ।
ॐ गणरक्षणकृते नमः ।
ॐ गणध्याताय नमः ।
ॐ गणगुरवे नमः । ६५।
ॐ गणप्रणयतत्पराय नमः ।
ॐ गणागणपरित्रात्रे नमः ।
ॐ गणादिहरणोदराय नमः ।
ॐ गणसेतवे नमः ।
ॐ गणनाथाय नमः । ७०।
ॐ गणकेतवे नमः ।
ॐ गणाग्रगाय नमः ।
ॐ गणहेतवे नमः ।
ॐ गणग्राहिणे नमः ।
ॐ गणानुग्रहकारकाय नमः । ७५।
ॐ गणागणानुग्रहभुवे नमः ।
ॐ गणागणवरप्रदाय नमः ।
ॐ गणस्तुताय नमः ।
ॐ गणप्राणाय नमः ।
ॐ गणसर्वस्वदायकाय नमः । ८०।
ॐ गणवल्लभमूर्तये नमः ।
ॐ गणभूतये नमः ।
ॐ गणेष्ठदाय नमः ।
ॐ गणसौख्यप्रदाय नमः ।
ॐ गणदुःखप्रणाशनाय नमः । ८५।
ॐ गणप्रथितनाम्ने नमः ।
ॐ गणाभीष्टकराय नमः ।
ॐ गणमान्याय नमः ।
ॐ गणख्याताय नमः ।
ॐ गणवीताय नमः । ९०।
ॐ गणोत्कटाय नमः ।
ॐ गणपालाय नमः ।
ॐ गणवराय नमः ।
ॐ गणगौरवदाय नमः ।
ॐ गणगर्जितसंतुष्टाय नमः । ९५।
ॐ गणस्वच्छंदगाय नमः ।
ॐ गणराजाय नमः ।
ॐ गणश्रीदाय नमः ।
ॐ गणभीतिहराय नमः ।
ॐ गणमूर्धाभिषिक्ताय नमः । १००।
ॐ गणसैन्यपुरःसराय नमः ।
ॐ गुणातीताय नमः ।
ॐ गुणमयाय नमः ।
ॐ गुणत्रयविभगकृते नमः ।
ॐ गुणिने नमः । १०५।
ॐ गुणकृतिधराय नमः ।
ॐ गुणशालिने नमः ।
ॐ गुणप्रियाय नमः ।
ॐ गुणपूर्णाय नमः ।
ॐ गुणभोधये नमः । ११०।
ॐ गुण भाजे नमः ।
ॐ गुणदूरगाय नमः ।
ॐ गुणागुणवपुषे नमः ।
ॐ गुणशरीराय नमः ।
ॐ गुणमण्डिताय नमः । ११५।
ॐ गुणस्रष्ट्रे नमः ।
ॐ गुणेशाय नमः ।
ॐ गुणेशानाय नमः ।
ॐ गुणेश्वराय नमः ।
ॐ गुणसृष्टजगत्संगाय नमः । १२०।
ॐ गुणसंघाय नमः ।
ॐ गुणैकराजे नमः ।

ॐ गुणप्रविष्टाय नमः ।
ॐ गुणभुवे नमः ।
ॐ गुणीकृतचराचराय नमः । १२५।
ॐ गुणप्रवणसंतुष्टाय नमः ।
ॐ गुणहीनपराङ्मुखाय नमः ।
ॐ गुणैकभुवे नमः ।
ॐ गुणश्रेष्टाय नमः ।
ॐ गुणज्येष्टाय नमः । १३०।
ॐ गुणप्रभवे नमः ।
ॐ गुणज्ञाय नमः ।
ॐ गुणसंपूज्याय नमः ।
ॐ गुणप्रणतपादाब्जाय नमः ।
ॐ गुणिगीताय नमः । १३५।
ॐ गुणोज्ज्वलाय नमः ।
ॐ गुणवते नमः ।
ॐ गुणसंपन्नाय नमः ।
ॐ गुणानन्दितमानसाय नमः ।
ॐ गुणसंचारचतुराय नमः । १४०।
ॐ गुणसंचयसुंदराय नमः ।
ॐ गुणगौराय नमः ।
ॐ गुणाधाराय नमः ।
ॐ गुणसंवृतचेतनाय नमः ।
ॐ गुणकृते नमः । १४५।
ॐ गुणभृते नमः ।
ॐ गुण्याय नमः ।
ॐ गुणाग्रयाय नमः ।
ॐ गुणपारदृशे नमः ।
ॐ गुणप्रचारिणे नमः । १५०।
ॐ गुणयुजे नमः ।
ॐ गुणागुणविवेककृते नमः ।
ॐ गुणाकराय नमः ।
ॐ गुणप्रवणवर्धनाय नमः ।
ॐ गुणगूढचराय नमः । १५५।
ॐ गौणसर्वसंसारचेष्टिताय नमः ।
ॐ गुणदक्षिणसौहार्दाय नमः ।
ॐ गुणदक्षिणतत्त्वविदे नमः ।
ॐ गुणहारिणे नमः । १६०।
ॐ गुणकलाय नमः ।
ॐ गुणसंघसखाय नमः ।
ॐ गुणस,न्स्कृतसंसाराय नमः ।
ॐ गुणतत्त्वविवेकाय नमः ।
ॐ गुणगर्वधराय नमः । १६५।
ॐ गौणसुखदुःखोदयाय नमः ।
ॐ गुणाय नमः ।
ॐ गुणाधीशाय नमः ।
ॐ गुणालयाय नमः ।
ॐ गुणवीक्षणालालसाय नमः । १७०।
ॐ गुणगौरवदात्रे नमः ।
ॐ गुणदात्रे नमः ।
ॐ गुणप्रभ्वे नमः ।
ॐ गुणकृते नमः ।
ॐ गुणसंबोधाय नमः । १७५।
ॐ गुणभुजे नमः ।
ॐ गुणबंधनाय नमः ।
ॐ गुणहृद्याय नमः ।
ॐ गुणस्थायिने नमः ।
ॐ गुणदायिने नमः । १८०।
ॐ गुणोत्कटाय नमः ।
ॐ गुणचक्रचराय नमः ।
ॐ गुणावताराय नमः ।
ॐ गुणबांधवाय नमः ।
ॐ गुणबंधवे नमः । १८५।
ॐ गुणप्रज्ञाय नमः ।
ॐ गुणप्राज्ञाय नमः ।

ॐ गुणालयाय नमः ।
ॐ गुणधात्रे नमः ।
ॐ गुणप्राणाय नमः । १९०।
ॐ गुणगोपाय नमः ।
ॐ गुणाश्रयाय नमः ।
ॐ गुणयायिने नमः ।
ॐ गुणदायिने नमः ।
ॐ गुणपाय नमः । १९५।
ॐ गुणपालकाय नमः ।
ॐ गुणहृततनवे नमः ।
ॐ गौणाय नमः ।
ॐ गीर्वाणाय नमः ।
ॐ गुणगौरवाय नमः । २००।
ॐ गुणवत्पूजितपदाय नमः ।
ॐ गुणवत्प्रीतिदाय नमः ।
ॐ गुणवते नमः ।
ॐ गीतकीर्तये नमः ।
ॐ गुणवद्भद्धसौहृदाय नमः । २०५।
ॐ गुणवद्वरदाय नमः ।
ॐ गुणवत्प्रतिपालकाय नमः ।
ॐ गुणवत्गुणसंतुष्टाय नमः ।
ॐ गुणवद्रचितद्रवाय नमः ।
ॐ गुणवद्रक्षणपराय नमः । २१०।
ॐ गुणवात्प्रणयप्रियाय नमः ।
ॐ गुणवच्चक्रसंचाराय नमः ।
ॐ गुणवत्कीर्तिवर्धनाय नमः ।
ॐ गुणवद्गुणचित्तस्थाय नमः ।
ॐ गुणवद्गुणरक्षणाय नमः । २१५।
ॐ गुणवत्पोषणकराय नमः ।
ॐ गुणवच्छत्रुसूदनाय नमः ।
ॐ गुणवत्सिद्धिदात्रे नमः ।
ॐ गुणवद्गौरवप्रदाय नमः ।
ॐ गुणवत्प्रणवस्वांताय नमः । २२०।
ॐ गुणवद्गुणभूषणाय नमः ।
ॐ गुणवत्कुलविद्वेषि विनाशकरण-
क्षमाय नमः ।
ॐ गुणिस्तुतगुणाय नमः ।
ॐ गर्जत्प्रलयांबुदनिःस्वनाय नमः ।
ॐ गजाय नमः । २२५।
ॐ गजाननाय नमः ।
ॐ गजपतये नमः ।
ॐ गर्जन्नागयुद्धविशारदाय नमः ।
ॐ गजकर्णाय नमः ।
ॐ गजराजाय नमः । २३०।
ॐ गजाननाय नमः ।
ॐ गजरूपधराय नमः ।
ॐ गर्जते नमः ।
ॐ गजयूथोद्धुरध्वनये नमः ।
ॐ गजाधीशाय नमः । २३५।
ॐ गजाधराय नमः ।
ॐ गजासुरजयोद्धुरय नमः ।
ॐ गजदंताय नमः ।
ॐ गजवराय नमः ।
ॐ गजकुंभाय नमः । २४०।
ॐ गजध्वनये नमः ।
ॐ गजमायाय नमः ।
ॐ गजमयाय नमः ।
ॐ गजश्रिये नमः ।
ॐ गजगर्जिताय नमः । २४५।
ॐ गजामयहराय नमः ।
ॐ गजपुष्टिप्रदाय नमः ।
ॐ गजोत्पत्तये नमः ।
ॐ गजत्रात्रे नमः ।
ॐ गजहेतवे नमः । २५०।

ॐ गजाधिपाय नमः ।
ॐ गजमुख्याय नमः ।
ॐ गजकुलप्रवराय नमः ।
ॐ गजदैत्यघ्ने नमः ।
ॐ गजकेतवे नमः । २५५।
ॐ गजाध्यक्षाय नमः ।
ॐ गजसेतवे नमः ।
ॐ गजाकृतये नमः ।
ॐ गजवंद्याय नमः ।
ॐ गजप्राणाय नमः । २६०।
ॐ गजसेव्याय नमः ।
ॐ गजप्रभवे नमः ।
ॐ गजमत्ताय नमः ।
ॐ गजेशानाय नमः ।
ॐ गजेशाय नमः । २६५।
ॐ गजपुंगवाय नमः ।
ॐ गजदंतधराय नमः ।
ॐ गर्जन्मधुपाय नमः ।
ॐ गजवेषभृते नमः ।
ॐ गजच्छद्मने नमः । २७०।
ॐ गजाग्रस्थाय नमः ।
ॐ गजयायिने नमः ।
ॐ गजाजयाय नमः ।
ॐ गजराजे नमः ।
ॐ गजयूथस्थाय नमः । २७५।
ॐ गजगर्जकभंजकाय नमः ।
ॐ गर्जितोज्झितदैत्यासिने नमः ।
ॐ गर्जितत्रातविष्टपाय नमः ।
ॐ गानज्ञाय नमः ।
ॐ गानकुशलाय नमः । २८०।
ॐ गानतत्त्वविवेचकाय नमः ।
ॐ गानश्लाघिने नमः ।
ॐ गानरसाय नमः ।
ॐ गानज्ञानपरायणाय नमः ।
ॐ गानागमज्ञाय नमः । २८५।
ॐ गानांगाय नमः ।
ॐ गानप्रवणचेतनाय नमः ।
ॐ गानध्येयाय नमः ।
ॐ गानगम्याय नमः ।
ॐ गानध्यानपरायणाय नमः । २९०।
ॐ गानभुवे नमः ।
ॐ गानकृते नमः ।
ॐ गानचतुराय नमः ।
ॐ गानविद्याविशारदाय नमः ।
ॐ गानशीलाय नमः । २९५।
ॐ गानशालिने नमः ।
ॐ गतश्रमाय नमः ।
ॐ गानविज्ञानसंपन्नाय नमः ।
ॐ गानश्रवणलालसाय नमः ।
ॐ गानायत्ताय नमः । ३००।
ॐ गानमयाय नमः ।
ॐ गानप्रणयवते नमः ।
ॐ गानध्यात्रे नमः ।
ॐ गानबुद्धये नमः ।
ॐ गानोत्सुकमनसे नमः । ३०५।
ॐ गानोत्सुकाय नमः ।
ॐ गानभूमये नमः ।
ॐ गानसीम्ने नमः ।
ॐ गानोज्ज्वलाय नमः ।
ॐ गानांगज्ञानवते नमः । ३१०।
ॐ गानमानवते नमः ।
ॐ गानपेशलाय नमः ।
ॐ गानवत्प्रणयाय नमः ।
ॐ गानसमुद्राय नमः ।

ॐ गानभूषणाय नमः । ३१५।
ॐ गानसिंधवे नमः ।
ॐ गानपराय नमः ।
ॐ गानप्राणाय नमः ।
ॐ गणाश्रयाय नमः ।
ॐ गनैकभुवे नमः । ३२०।
ॐ गानहृष्टाय नमः ।
ॐ गानचक्षुषे नमः ।
ॐ गनैकदृशे नमः ।
ॐ गानमत्ताय नमः ।
ॐ गानरुचये नमः । ३२५।
ॐ गानविदे नमः ।
ॐ गनवित्प्रियाय नमः ।
ॐ गानांतरात्मने नमः ।
ॐ गानाढ्याय नमः ।
ॐ गानभ्राजत्स्वभावाय नमः । ३३०।
ॐ गनमायाय नमः ।
ॐ गानधराय नमः ।
ॐ गानविद्याविशोधकाय नमः ।
ॐ गानाहितघ्नाय नमः ।
ॐ गानेन्द्राय नमः । ३३५।
ॐ गानलीलाय नमः ।
ॐ गतिप्रियाय नमः ।
ॐ गानाधीशाय नमः ।
ॐ गानलयाय नमः ।
ॐ गानाधाराय नमः । ३४०।
ॐ गतीश्वराय नमः ।
ॐ गानवन्मानदाय नमः ।
ॐ गानभूतये नमः ।
ॐ गानैकभूतिमते नमः ।
ॐ गानताननताय नमः । ३४५।
ॐ गानतानदानविमोहिताय नमः ।
ॐ गुरवे नमः ।
ॐ गुरूदरश्रेणये नमः ।
ॐ गुरुतत्त्वार्थदर्शनाय नमः ।
ॐ गुरुस्तुताय नमः । ३५०।
ॐ गुरुगुणाय नमः ।
ॐ गुरुमायाय नमः ।
ॐ गुरुप्रियाय नमः ।
ॐ गुरुकीर्तये नमः ।
ॐ गुरुभुजाय नमः । ३५५।
ॐ गुरुवक्षसे नमः ।
ॐ गुरुप्रभाय नमः ।
ॐ गुरुलक्षणसंपन्नाय नमः ।
ॐ गुरुद्रोहपराङ्मुखाय नमः ।
ॐ गुरुविद्याय नमः । ३६०।
ॐ गुरुप्रणाय नमः ।
ॐ गुरुबाहुबलोच्छ्रयाय नमः ।
ॐ गुरुदैत्यप्राणहराय नमः ।
ॐ गुरुदैत्यापहारकाय नमः ।
ॐ गुरुगर्वहराय नमः । ३६५।
ॐ गुरुप्रवराय नमः ।
ॐ गुरुदर्पघ्ने नमः ।
ॐ गुरुगौरवदायिने नमः ।
ॐ गुरुभीत्यपहारकाय नमः ।
ॐ गुरुशुण्डाय नमः । ३७०।
ॐ गुरुस्कन्धाय नमः ।
ॐ गुरुजंघाय नमः ।
ॐ गुरुप्रथाय नमः ।
ॐ गुरुभालाय नमः ।
ॐ गुरुगलाय नमः । ३७५।
ॐ गुरुश्रिये नमः ।
ॐ गुरुगर्वनुदे नमः ।
ॐ गुरवे नमः ।

ॐ गुरुपीनांसाय नमः ।
ॐ गुरुप्रणयलालसाय नमः । ३८०।
ॐ गुरुमुख्याय नमः ।
ॐ गुरुकुलस्थायिने नमः ।
ॐ गुणगुरवे नमः ।
ॐ गुरुसंशयभेत्रे नमः ।
ॐ गुरुमानप्रदायकाय नमः । ३८५।
ॐ गुरुधर्मसदाराध्याय नमः ।
ॐ गुरुधर्मनिकेतनाय नमः ।
ॐ गुरुदैत्यगलच्छेत्रे नमः ।
ॐ गुरुसैन्याय नमः ।
ॐ गुरुद्युतये नमः । ३९०।
ॐ गुरुधर्माग्रण्याय नमः ।
ॐ गुरुधर्मधुरंधराय नमः ।
ॐ गरिष्ठाय नमः ।
ॐ गुरुसंतापशमनाय नमः ।
ॐ गुरुपूजिताय नमः । ३९५।
ॐ गुरुधर्मधराय नमः ।
ॐ गौरवधर्मधराय नमः ।
ॐ गदापहाय नमः ।
ॐ गुरुशास्त्रविचारज्ञाय नमः ।
ॐ गुरुशास्त्रकृतोद्यमाय नमः । ४००।
ॐ गुरुशास्त्रार्थनिलयाय नमः ।
ॐ गुरुशास्त्रालयाय नमः ।
ॐ गुरुमन्त्राय नमः ।
ॐ गुरुश्रेष्ठाय नमः ।
ॐ गुरुमन्त्रफलप्रदाय नमः । ४०५।
ॐ गुरुस्त्रीगमनदोषप्रायश्चित्तनिवारकाय नमः ।
ॐ गुरुसंसारसुखदाय नमः ।
ॐ गुरुसंसारदुःखभिदे नमः ।
ॐ गुरुश्लाघापराय नमः ।
ॐ गौरभानुखंडावतंसभृते नमः । ४१०।
ॐ गुरुप्रसन्नमूर्तये नमः ।
ॐ गुरुशापविमोचकाय नमः ।
ॐ गुरुकांतये नमः ।
ॐ गुरुमहते नमः ।
ॐ गुरुशासनपालकाय नमः । ४१५।
ॐ गुरुतंत्राय नमः ।
ॐ गुरुप्रज्ञाय नमः ।
ॐ गुरुभाय नमः ।
ॐ गुरुदैवताय नमः ।
ॐ गुरुविक्रमसंचाराय नमः । ४२०।
ॐ गुरुदृशे नमः ।
ॐ गुरुविक्रमाय नमः ।
ॐ गुरुक्रमाय नमः ।
ॐ गुरुप्रेष्ठाय नमः ।
ॐ गुरुपाखंडखंडकाय नमः । ४२५।
ॐ गुरुगर्जितसंपूर्णब्रह्माण्डाय नमः ।
ॐ गुरुगर्जिताय नमः ।
ॐ गुरुपुत्रप्रियसखाय नमः ।
ॐ गुरुपुत्रभयापहाय नमः ।
ॐ गुरुपुत्रपरित्रात्रे नमः । ४३०।
ॐ गुरुपुत्रवरप्रदाय नमः ।
ॐ गुरुपुत्रार्तिशमनाय नमः ।
ॐ गुरुपुत्राधिनाशनाय नमः ।
ॐ गुरुपुत्रप्राणदाय नमः ।
ॐ गुरुभक्तिपरायणाय नमः । ४३५।
ॐ गुरुविज्ञानविभवाय नमः ।
ॐ गौरभानुवरप्रदाय नमः ।
ॐ गौरभानुसुताय नमः ।
ॐ गौरभानुत्रासापहारकाय नमः ।
ॐ गौरभानुप्रियाय नमः । ४४०।
ॐ गौरभानवे नमः ।
ॐ गौरववर्धनाय नमः ।

ॐ गौरभानुपरित्रात्रे नमः ।
ॐ गौरभानुसखाय नमः ।
ॐ गौरभानुप्रभवे नमः । ४४५।
ॐ गौरभानुमत्प्राणनाशनाय नमः ।
ॐ गौरीतेजःसमुत्पन्नाय नमः ।
ॐ गौरीहृदयनन्दनाय नमः ।
ॐ गौरीस्तनंधयाय नमः ।
ॐ गौरीमनोवाञ्चितसिद्धिकृते नमः । ४५०।
ॐ गौराय नमः ।
ॐ गौरगुणाय नमः ।
ॐ गौरप्रकाशाय नमः ।
ॐ गौरभैरवाय नमः ।
ॐ गौरीशनन्दनाय नमः । ४५५।
ॐ गौरीप्रियपुत्राय नमः ।
ॐ गदाधराय नमः ।
ॐ गौरीवरप्रदाय नमः ।
ॐ गौरीप्रणयाय नमः ।
ॐ गौरच्छवये नमः । ४६०।
ॐ गौरीगणेश्वराय नमः ।
ॐ गौरीप्रवणाय नमः ।
ॐ गौरभावनाय नमः ।
ॐ गौरात्मने नमः ।
ॐ गौरकीर्तये। ४६५।
ॐ गौरभावाय नमः ।
ॐ गरिष्ठदृशे नमः ।
ॐ गौतमाय नमः ।
ॐ गौतमीनाथाय नमः ।
ॐ गौतमीप्राणवल्लभाय नमः । ४७०।
ॐ गौतमाभीष्टवरदाय नमः ।
ॐ गौतमाभयदायकाय नमः ।
ॐ गौतमप्रणयप्रहवाय नमः ।
ॐ गौतमाश्रमदुःखघ्ने नमः ।
ॐ गौतमीतीरसंचारिणे नमः । ४७५।
ॐ गौतमीतीर्थदायकाय नमः ।
ॐ गौतमापत्परिहराय नमः ।
ॐ गौतमाधिविनाशनाय नमः ।
ॐ गोपतये नमः ।
ॐ गोधनाय नमः । ४८०।
ॐ गोपाय नमः ।
ॐ गोपालप्रियदर्शनाय नमः ।
ॐ गोपालाय नमः ।
ॐ गोगणाधीशाय नमः ।
ॐ गोकश्मलनिवर्तकाय नमः । ४८५।
ॐ गोसहस्राय नमः ।
ॐ गोपवराय नमः ।
ॐ गोपगोपीसुखावहाय नमः ।
ॐ गोवर्धनाय नमः ।
ॐ गोपगोपाय नमः । ४९०।
ॐ गोपाय नमः ।
ॐ गोकुलवर्धनाय नमः ।
ॐ गोचराय नमः ।
ॐ गोचराध्यक्षाय नमः ।
ॐ गोचरप्रीतिवृद्धिकृते नमः । ४९५।
ॐ गोमिने नमः ।
ॐ गोकष्टसंत्रात्रे नमः ।
ॐ गोसंतापनिवर्तकाय नमः ।
ॐ गोष्ठाय नमः ।
ॐ गोष्ठाश्रयाय नमः । ५००।
ॐ गोष्ठपतये नमः ।
ॐ गोधनवर्धनाय नमः ।
ॐ गोष्ठप्रियाय नमः ।
ॐ गोष्ठमयाय नमः ।
ॐ गोष्ठामयनिवर्तकाय नमः । ५०५।
ॐ गोलोकाय नमः ।

ॐ गोलकाय नमः ।
ॐ गोभृते नमः ।
ॐ गोभर्त्रे नमः ।
ॐ गोसुखावहाय नमः । ५१०।
ॐ गोदुहे नमः ।
ॐ गोधुग्गणप्रेष्ठाय नमः ।
ॐ गोदोग्ध्रे नमः ।
ॐ गोपयःप्रियाय नमः ।
ॐ गोत्राय नमः । ५१५।
ॐ गोत्रपतये नमः ।
ॐ गोत्रभवाय नमः ।
ॐ गोत्रभयापहाय नमः ।
ॐ गोत्रवृद्धिकराय नमः ।
ॐ गोत्रप्रियाय नमः । ५२०।
ॐ गोत्रातिनाशनाय नमः ।
ॐ गोत्रोद्धारपराय नमः ।
ॐ गोत्रप्रभवाय नमः ।
ॐ गोत्रदेवतायै नमः ।
ॐ गोत्रविख्यातनाम्ने नमः । ५२५।
ॐ गोत्रिणे नमः ।
ॐ गोत्रप्रपालकाय नमः ।
ॐ गोत्रसेतवे नमः ।
ॐ गोत्रकेतवे नमः ।
ॐ गोत्रहेतवे नमः । ५३०।
ॐ गतक्लमाय नमः ।
ॐ गोत्रत्राणकराय नमः ।
ॐ गोत्रपतये नमः ।
ॐ गोत्रेशपूजिताय नमः ।
ॐ गोत्रविदे नमः । ५३५।
ॐ गोत्रभित्त्रात्रे नमः ।
ॐ गोत्रभिद्वरदायकाय नमः ।
ॐ गोत्रभित्पूजितपदाय नमः ।
ॐ गोत्रभिच्छत्रुसूदनाय नमः ।
ॐ गोत्रभित्प्रीतिदाय नमः । ५४०।
ॐ गोत्रभिदे नमः ।
ॐ गोत्रपालकाय नमः ।
ॐ गोत्रभिद्गीतचरिताय नमः ।
ॐ गोत्रभिद्राज्यरक्षकाय नमः ।
ॐ गोत्रभिद्वरदायिने नमः । ५४५।
ॐ गोत्रभित्प्राणनिलयाय नमः ।
ॐ गोत्रभिद्भयसंहर्त्रे नमः ।
ॐ गोत्रभिन्मानदायकाय नमः ।
ॐ गोत्रभिद्गोपनपराय नमः ।
ॐ गोत्रभित्सैन्यनायकाय नमः । ५५०।
ॐ गोत्राधिपप्रियाय नमः ।
ॐ गोत्रापुत्रप्रीताय नमः ।
ॐ गिरिप्रियाय नमः ।
ॐ ग्रन्थज्ञाय नमः ।
ॐ ग्रन्थकृते नमः । ५५५।
ॐ ग्रन्थग्रन्थिदाय नमः ।
ॐ ग्रन्थविघ्नघ्ने नमः ।
ॐ ग्रन्थादये नमः ।
ॐ ग्रन्थसञ्चारये नमः ।
ॐ ग्रन्थश्रवणलोलुपाय नमः । ५६०।
ॐ ग्रन्ताधीनक्रियाय नमः ।
ॐ ग्रन्थप्रियाय नमः ।
ॐ ग्रन्थार्थतत्त्वविदे नमः ।
ॐ ग्रन्थसंशयसंछेदिने नमः ।
ॐ ग्रन्थवक्त्राय नमः । ५६५।
ॐ ग्रहाग्रण्ये नमः ।
ॐ ग्रन्थगीतगुणाय नमः ।
ॐ ग्रन्थगीताय नमः ।
ॐ ग्रन्थादिपूजिताय नमः ।
ॐ ग्रन्थारंभस्तुताय नमः । ५७०।

ॐ ग्रन्थग्राहिणे नमः ।
ॐ ग्रन्थार्थपारदृशे नमः ।
ॐ ग्रन्थदृशे नमः ।
ॐ ग्रन्थविज्ञानाय नमः ।
ॐ ग्रन्थसंदर्शशोधकाय नमः । ५७५।
ॐ ग्रन्थकृत्पूजिताय नमः ।
ॐ ग्रन्थकराय नमः ।
ॐ ग्रन्थपरायणाय नमः ।
ॐ ग्रन्थपारायणपराय नमः ।
ॐ ग्रन्थसंदेहभंजकाय नमः । ५८०।
ॐ ग्रन्थकृद्वरदात्रे नमः ।
ॐ ग्रन्थकृते नमः ।
ॐ ग्रन्थवन्दिताय नमः ।
ॐ ग्रन्थानुरक्ताय नमः ।
ॐ ग्रन्थज्ञाय नमः । ५८५।
ॐ ग्रन्थानुग्रहदायकाय नमः ।
ॐ ग्रन्थान्तरात्मने नमः ।
ॐ ग्रन्थार्थपण्डिताय नमः ।
ॐ ग्रन्थसौहृदाय नमः ।
ॐ ग्रन्थपारङ्गमाय नमः । ५९०।
ॐ ग्रन्थगुणविदे नमः ।
ॐ ग्रन्थविग्रहाय नमः ।
ॐ ग्रन्थसेवते नमः ।
ॐ ग्रन्थहेतवे नमः ।
ॐ ग्रन्थकेतवे नमः । ५९५।
ॐ ग्रहाग्रगाय नमः ।
ॐ ग्रन्थपूज्याय नमः ।
ॐ ग्रन्थगेयाय नमः ।
ॐ ग्रन्थग्रथनलालसाय नमः ।
ॐ ग्रन्थभूमये नमः । ६००।
ॐ ग्रहश्रेष्ठाय नमः ।
ॐ ग्रहकेतवे नमः ।
ॐ ग्रहाश्रयाय नमः ।
ॐ ग्रन्थकाराय नमः ।
ॐ ग्रन्थकारमान्याय नमः । ६०५।
ॐ ग्रन्थप्रसारकाय नमः ।
ॐ ग्रन्थश्रमज्ञाय नमः ।
ॐ ग्रन्थांगाय नमः ।
ॐ ग्रन्थभ्रमनिवारकाय नमः ।
ॐ ग्रन्थप्रवणसर्वाङ्गाय नमः । ६१०।
ॐ ग्रन्थप्रणयतत्पराय नमः ।
ॐ गीताय नमः ।
ॐ गीतगुणाय नमः ।
ॐ गीतकीर्तये नमः ।
ॐ गीतविशारदाय नमः । ६१५।
ॐ गीतस्फीतये नमः ।
ॐ गीतप्रणयिने नमः ।
ॐ गीतचंचुराय नमः ।
ॐ गीतप्रसन्नाय नमः ।
ॐ गीतात्मने नमः । ६२०।
ॐ गीतलोलाय नमः ।
ॐ गीतस्पृहाय नमः ।
ॐ गीताश्रयाय नमः ।
ॐ गीतमयाय नमः ।
ॐ गीततत्वार्थकोविदाय नमः । ६२५।
ॐ गीतसंशयसंछेत्रे नमः ।
ॐ गीतसङ्गीतशासनाय नमः ।
ॐ गीतार्थज्ञाय नमः ।
ॐ गीततत्वाय नमः ।
ॐ गीतातत्वाय नमः । ६३०।
ॐ गताश्रयाय नमः ।
ॐ गीतसाराय नमः ।
ॐ गीतकृतये नमः ।
ॐ गीतविघ्नविनाशनाय नमः ।

ॐ गीतासक्ताय नमः । ६३५।
ॐ गीतलीनाय नमः ।
ॐ गीताविगतसंज्ञ्राय नमः ।
ॐ गीतैकदृशे नमः ।
ॐ गीतभूतये नमः ।
ॐ गीताप्रियाय नमः । ६४०।
ॐ गतालसाय नमः ।
ॐ गीतवाद्यपटवे नमः ।
ॐ गीतप्रभवे नमः ।
ॐ गीतार्थतत्वविदे नमः ।
ॐ गीतागीतविवेकज्ञाय नमः । ६४५।
ॐ गीतप्रवणचेतनाय नमः ।
ॐ गतभिये नमः ।
ॐ गतविद्वेषाय नमः ।
ॐ गतसंसारबंधनाय नमः ।
ॐ गतमायाय नमः । ६५०।
ॐ गतत्रासाय नमः ।
ॐ गतदुःखाय नमः ।
ॐ गतज्वराय नमः ।
ॐ गतासुहृदे नमः ।
ॐ गताज्ञानाय नमः । ६५५।
ॐ गतदुष्टाशयाय नमः ।
ॐ गताय नमः ।
ॐ गतार्तये नमः ।
ॐ गतसंकल्पाय नमः ।
ॐ गतदुष्टविचेष्टिताय नमः । ६६०।
ॐ गताहंहारसंचाराय नमः ।
ॐ गतदर्पाय नमः ।
ॐ गताहिताय नमः ।
ॐ गताविद्याय नमः ।
ॐ गतभयाय नमः । ६६५।
ॐ गतागतनिवारकाय नमः ।
ॐ गतव्यथाय नमः ।
ॐ गतापायाय नमः ।
ॐ गतदोषाय नमः ।
ॐ गतेः पराय नमः । ६७०।
ॐ गतसर्वविकाराय नमः ।
ॐ गजगर्जितकुञ्जराय नमः ।
ॐ गतकंपितमूपृष्ठाय नमः ।
ॐ गतरुषे नमः ।
ॐ गतकल्मषाय नमः । ६७५।
ॐ गतदैन्याय नमः ।
ॐ गतस्तैन्याय नमः ।
ॐ गतमानाय नमः ।
ॐ गतश्रमाय नमः ।
ॐ गतक्रोधाय नमः । ६८०।
ॐ गतग्लानये नमः ।
ॐ गतम्लानये नमः ।
ॐ गतभ्रमाय नमः ।
ॐ गताभावाय नमः ।
ॐ गतभवाय नमः । ६८५।
ॐ गततत्वार्थसंशयाय नमः ।
ॐ गयासुरशिरश्छेत्रे नमः ।
ॐ गयासुरवरप्रदाय नमः ।
ॐ गयावासाय नमः ।
ॐ गयानाथाय नमः । ६९०।
ॐ गयावासिनमस्कृतय नमः ।
ॐ गयातीर्थफलाध्यक्षाय नमः ।
ॐ गयायात्राफलप्रदाय नमः ।
ॐ गयामयाय नमः ।
ॐ गयाक्षेत्राय नमः । ६९५।
ॐ गयाक्षेत्रनिवासकृते नमः ।
ॐ गयावासिस्तुताय नमः ।
ॐ गायन्मधुव्रतलसत्कटाय नमः ।

ॐ गायकाय नमः ।
ॐ गायकवराय नमः । ७००।
ॐ गायकेष्टफलप्रदाय नमः ।
ॐ गायकप्रणयिने नमः ।
ॐ गात्रे नमः ।
ॐ गायकाभयदायकाय नमः ।
ॐ गायकप्रवणस्वांताय नमः । ७०५।
ॐ गायकप्रथमाय नमः ।
ॐ गायकोद्गीतसंप्रीताय नमः ।
ॐ गायकोत्कटविघ्नघ्ने नमः ।
ॐ गानगेयाय नमः ।
ॐ गायकेशाय नमः । ७१०।
ॐ गायकांतरसंचाराय नमः ।
ॐ गायकप्रियदाय नमः ।
ॐ गायकाधीनविग्रहाय नमः ।
ॐ गेयाय नमः ।
ॐ गेयगुणाय नमः । ७१५।
ॐ गेयचरिताय नमः ।
ॐ गेयतत्वविदे नमः ।
ॐ गायकत्रासघ्ने नमः ।
ॐ ग्रंथाय नमः ।
ॐ ग्रंथतत्वविवेचकाय नमः । ७२०।
ॐ गाढानुरागाय नमः ।
ॐ गाढांगाय नमः ।
ॐ गाढगंगाजलोद्वहाय नमः ।
ॐ गाढावगाढजलधये नमः ।
ॐ गाढप्रज्ञाय नमः । ७२५।
ॐ गतामयाय नमः ।
ॐ गाढप्रत्यर्थिसैन्याय नमः ।
ॐ गाढानुग्रहतत्पराय नमः ।
ॐ गाढाश्लेषरसाभिज्ञाय नमः ।
ॐ गाढनिर्वृत्तिसाधकाय नमः । ७३०।
ॐ गंगाधरेष्टवरदाय नमः ।
ॐ गंगाधरभयापहाय नमः ।
ॐ गंगाधरगुरवे नमः ।
ॐ गंगाधरध्यानपरायणाय नमः ।
ॐ गंगाधरस्तुताय नमः । ७३५।
ॐ गंगाधरराध्याय नमः ।
ॐ गतस्मयाय नमः ।
ॐ गंगाधरप्रियाय नमः ।
ॐ गंगाधराय नमः ।
ॐ गंगांबुसुन्दराय नमः । ७४०।
ॐ गंगाजलरसास्वाद चतुराय नमः ।
ॐ गंगानिरताय नमः ।
ॐ गंगाजलप्रणयवते नमः ।
ॐ गंगातीरविहाराय नमः ।
ॐ गंगाप्रियाय नमः । ७४५।
ॐ गंगाजलावगाहनपराय नमः ।
ॐ गन्धमादनसंवासाय नमः ।
ॐ गन्धमादनकेलिकृते नमः ।
ॐ गन्धानुलिप्तसर्वाङ्गाय नमः ।
ॐ गन्धलुभ्यन्मधुव्रताय नमः । ७५०।
ॐ गन्धाय नमः ।
ॐ गन्धर्वराजाय नमः ।
ॐ गन्धर्वप्रियकृते नमः ।
ॐ गन्धर्वविद्यातत्वज्ञाय नमः ।
ॐ गन्धर्वप्रीतिवर्धनाय नमः । ७५५।
ॐ गकारबीजनिलयाय नमः ।
ॐ गन्धकाय नमः ।
ॐ गर्विगर्वनुदे नमः ।
ॐ गन्धर्वगणसंसेव्याय नमः ।
ॐ गन्धर्ववरदायकाय नमः । ७६०।
ॐ गन्धर्वाय नमः ।
ॐ गन्धमातङ्गाय नमः ।

ॐ गन्धर्वकुलदैवताय नमः ।
ॐ गन्धर्वसंशयच्छेत्रे नमः ।
ॐ गन्धर्ववरदर्पघ्ने नमः । ७६५।
ॐ गन्धर्वप्रवणस्वान्ताय नमः ।
ॐ गन्धर्वगणसंस्तुताय नमः ।
ॐ गन्धर्वार्चितपादाब्जाय नमः ।
ॐ गन्धर्वभयहारकाय नमः ।
ॐ गन्धर्वाभयदाय नमः । ७७०।
ॐ गन्धर्वप्रीतिपालकाय नमः ।
ॐ गन्धर्वगीतचरिताय नमः ।
ॐ गन्धर्वप्रणयोत्सुकाय नमः ।
ॐ गन्धर्वगानश्रवणप्रणयिने नमः ।
ॐ गन्धर्वभाजनाय नमः । ७७५।
ॐ गन्धर्वत्राणसन्नद्धय नमः ।
ॐ गन्धर्वसमरक्षमाय नमः ।
ॐ गन्धर्वस्त्रीभिराराध्याय नमः ।
ॐ गानाय नमः ।
ॐ गानपटवे नमः । ७८०।
ॐ गच्छाय नमः ।
ॐ गच्छपतये नमः ।
ॐ गच्छनायकाय नमः ।
ॐ गच्छगर्वघ्ने नमः ।
ॐ गच्छराजाय नमः । ७८५।
ॐ गच्छेशाय नमः ।
ॐ गच्छराजनमस्कृताय नमः ।
ॐ गच्छप्रियाय नमः ।
ॐ गच्छगुरवे नमः ।
ॐ गच्छत्राणकृतोद्यमाय नमः । ७९०।
ॐ गच्छप्रभवे नमः ।
ॐ गच्छचराय नमः ।
ॐ गच्छप्रियकृतोद्यमाय नमः ।
ॐ गच्छातीतगुणाय नमः ।
ॐ गच्छमर्यादाप्रतिपालकाय नमः । ७९५।
ॐ गच्छधात्रे नमः ।
ॐ गच्छभर्त्रे नमः ।
ॐ गच्छवन्द्याय नमः ।
ॐ गुरोर्गुरवे नमः ।
ॐ गृत्साय नमः । ८००।
ॐ गृत्समदाय नमः ।
ॐ गृत्समदाभीष्टवरप्रदाय नमः ।
ॐ गीर्वाणगीतचरिताय नमः ।
ॐ गीर्वाणगणसेविताय नमः ।
ॐ गीर्वाणवरदात्रे नमः । ८०५।
ॐ गीर्वाणभयनाशकृते नमः ।
ॐ गीर्वाणगणसङ्गीताय नमः ।
ॐ गीर्वाणारातिसूदनाय नमः ।
ॐ गीर्वाणधाम्ने नमः ।
ॐ गीर्वाणगोप्त्रे नमः । ८१०।
ॐ गीर्वाणगर्वनुदे नमः ।
ॐ गीर्वाणार्तिहराय नमः ।
ॐ गीर्वाणवरदायकाय नमः ।
ॐ गीर्वाणशरणाय नमः ।
ॐ गीतनाम्ने नमः । ८१५।
ॐ गीर्वाणसुन्दराय नमः ।
ॐ गीर्वाणप्राणदाय नमः ।
ॐ गंत्रे नमः ।
ॐ गीर्वाणानीकरक्षकाय नमः ।
ॐ गुहेहापूरकाय नमः । ८२०।
ॐ गन्धमत्ताय नमः ।
ॐ गीर्वाणपुष्टिदाय नमः ।
ॐ गीर्वाणप्रयुतत्रात्रे नमः ।
ॐ गीतगोत्राय नमः ।
ॐ गताहिताय नमः । ८२५।
ॐ गीर्वाणसेवितपदाय नमः ।

ॐ गीर्वाणप्रथिताय नमः ।
ॐ गलते नमः ।
ॐ गीर्वाणगोत्रप्रवराय नमः ।
ॐ गीर्वाणबलदाय नमः । ८३०।
ॐ गीर्वाणप्रियकर्त्रे नमः ।
ॐ गीर्वाणागमसारविदे नमः ।
ॐ गीर्वाणागमसंपत्तये नमः ।
ॐ गीर्वाणव्यसनापत्ने नमः ।
ॐ गीर्वाणप्रणयाय नमः । ८३५।
ॐ गीतग्रहणोत्सुकमानसाय नमः ।
ॐ गीर्वाणमदसंहर्त्रे नमः ।
ॐ गीर्वाणगणपालकाय नमः ।
ॐ ग्रहाय नमः ।
ॐ ग्रहपतये नमः । ८४०।
ॐ ग्राहाय नमः ।
ॐ ग्रहपीडाप्रणाशनाय नमः ।
ॐ ग्रहस्तुताय नमः ।
ॐ ग्रहाध्यक्षाय नमः ।
ॐ ग्रहेशाय नमः । ८४५।
ॐ ग्रहदैवताय नमः ।
ॐ ग्रहकृते नमः ।
ॐ ग्रहभर्त्रे नमः ।
ॐ ग्रहेशानाय नमः ।
ॐ ग्रहेश्वराय नमः । ८५०।
ॐ ग्रहाराध्याय नमः ।
ॐ ग्रहत्रात्रे नमः ।
ॐ ग्रहगोप्त्रे नमः ।
ॐ ग्रहोत्कटाय नमः ।
ॐ ग्रहगीतगुणाय नमः । ८५५।
ॐ ग्रन्थप्रणेत्रे नमः ।
ॐ ग्रहवन्दिताय नमः ।
ॐ गविने नमः ।
ॐ गवीश्वराय नमः ।
ॐ ग्रहणे नमः । ८६०।
ॐ ग्रहष्ठायनमः ।
ॐ ग्रहगर्वघ्ने नमः ।
ॐ गवांप्रियाय नमः ।
ॐ गवांनाथाय नमः ।
ॐ गवीशानाय नमः । ८६५।
ॐ गवांपतये नमः ।
ॐ गव्यप्रियाय नमः ।
ॐ गवांगोप्त्रे नमः ।
ॐ गविसंपत्तिसाधकाय नमः ।
ॐ गविरक्षणसन्नद्धाय नमः । ८७०।
ॐ गविभयहरय नमः ।
ॐ गविगर्वहराय नमः ।
ॐ गोदाय नमः ।
ॐ गोप्रदाय नमः ।
ॐ गोजयप्रदाय नमः । ८७५।
ॐ गोजायुतबलाय नमः ।
ॐ गंडगुंजन्मधुव्रताय नमः ।
ॐ गंडस्थलगलद्दानमिलन्मत्तालिमण्डिताय नमः ।
ॐ गुडाय नमः ।
ॐ गुडाप्रियाय नमः । ८८०।
ॐ गण्डगलद्दानाय नमः ।
ॐ गुडाशनाय नमः ।
ॐ गुडाकेशाय नमः ।
ॐ गुडाकेशसहायाय नमः ।
ॐ गुडलड्डुभुजे नमः । ८८५।
ॐ गुडभुजे नमः ।
ॐ गुडभुग्गण्याय नमः ।
ॐ गुडाकेशवरप्रदाय नमः ।
ॐ गुडाकेशार्चितपदाय नमः ।

ॐ गुडाकेशसखाय नमः । ८९०।
ॐ गदाधरार्चितपदाय नमः ।
ॐ गदाधरजयप्रदाय नमः ।
ॐ गदायुधाय नमः ।
ॐ गदापाणये नमः ।
ॐ गदायुद्धविशारदाय नमः । ८९५।
ॐ गदघ्ने नमः ।
ॐ गददर्पघ्ने नमः ।
ॐ गदगर्वप्रणाशनाय नमः ।
ॐ गदग्रस्तपरित्रात्रे नमः ।
ॐ गदाडंबरखण्डकाय नमः । ९००।
ॐ गुहाय नमः ।
ॐ गुहाग्रजाय नमः ।
ॐ गुप्ताय नमः ।
ॐ गुहाशायिने नमः ।
ॐ गुहाशयाय नमः । ९०५।
ॐ गुहप्रीतिकराय नमः ।
ॐ गूढाय नमः ।
ॐ गूढगुल्फाय नमः ।
ॐ गुणैकदृशे नमः ।
ॐ गिरे नमः । ९१०।
ॐ गीष्पतये नमः ।
ॐ गिरीशानाय नमः ।
ॐ गीर्देवीगीतसद्गुणाय नमः ।
ॐ गीर्देवाय नमः ।
ॐ गीष्प्रियाय नमः । ९१५।
ॐ गीर्भुवे नमः ।
ॐ गीरात्मने नमः ।
ॐ गीष्प्रियङ्कराय नमः ।
ॐ गीर्भूमये अमः ।
ॐ गीरसञ्याय नमः । ९२०।
ॐ गीःप्रसन्नाय नमः ।
ॐ गिरीश्वराय नमः ।
ॐ गिरीशजाय नमः ।
ॐ गिरीशायिने नमः ।
ॐ गिरिराजसुखावहाय नमः । ९२५।
ॐ गिरिराजार्चितपदाय नमः ।
ॐ गिरिराजनमस्कृताय नमः ।
ॐ गिरिराजगुहाविष्टाय नमः ।
ॐ गिरिराजाभयप्रदाय नमः ।
ॐ गिरिराजेष्टवरदाय नमः । ९३०।
ॐ गिरिराजप्रपालकाय नमः ।
ॐ गिरिराजसुतासूनवे नमः ।
ॐ गिरिराजजयप्रदाय नमः ।
ॐ गिरिव्रजवनस्थायिने नमः ।
ॐ गिरिव्रजचराय नमः । ९३५।
ॐ गर्गाय नमः ।
ॐ गर्गप्रियाय नमः ।
ॐ गर्गदेवाय नमः ।
ॐ गर्गनमस्कृताय नमः ।
ॐ गर्गभीतिहराय नमः । ९४०।
ॐ गर्गवरदाय नमः ।
ॐ गर्गसंस्तुताय नमः ।
ॐ गर्गगीतप्रसन्नात्मने नमः ।
ॐ गर्गानन्दकराय नमः ।
ॐ गर्गप्रियाय नमः । ९४५।
ॐ गर्गमानप्रदाय नमः ।
ॐ गर्गारिभञ्जकाय नमः ।
ॐ गर्गवर्गपरित्रात्रे नमः ।
ॐ गर्गसिद्धिप्रदायकाय नमः ।
ॐ गर्गग्लानिहराय नमः । ९५०।
ॐ गर्गश्रमनुदे नमः ।
ॐ गर्गसङ्गताय नमः ।
ॐ गर्गाचार्याय नमः ।

ॐ गर्गऋषये नमः ।
ॐ गर्गसन्मानभाजनाय नमः । ९५५।
ॐ गंभीराय नमः ।
ॐ गणितप्रज्ञाय नमः ।
ॐ गणितागमसारविदे नमः ।
ॐ गणकाय नमः ।
ॐ गणकश्लाघ्याय नमः । ९६०।
ॐ गणकप्रणयोत्सुकाय नमः ।
ॐ गणकप्रवणस्वान्ताय नमः ।
ॐ गणिताय नमः ।
ॐ गणितागमाय नमः ।
ॐ गद्याय नमः । ९६५।
ॐ गद्यमयाय नमः ।
ॐ गद्यपद्यविद्याविवेचकाय नमः ।
ॐ गलल्गनमहानागाय नमः ।
ॐ गलदर्चिषे नमः ।
ॐ गलन्मदाय नमः । ९७०।
ॐ गलत्कुष्ठिव्यथाहन्त्रे नमः ।
ॐ गलत्कुष्ठिसुखप्रदाय नमः ।
ॐ गंभीरनाभये नमः ।
ॐ गंभीरस्वराय नमः ।
ॐ गंभीरलोचनाय नमः । ९७५।
ॐ गंभीरगुणसंपन्नाय नमः ।
ॐ गंभीरगतिशोभनाय नमः ।
ॐ गर्भप्रदाय नमः ।
ॐ गर्भरूपाय नमः ।
ॐ गर्भापद्विनिवारकाय नमः । ९८०।
ॐ गर्भागमनसंभूतये नमः ।
ॐ गर्भदाय नमः ।
ॐ गर्भशोकनुदे नमः ।
ॐ गर्भत्रात्रे नमः ।
ॐ गर्भगोप्त्रे नमः । ९८५।
ॐ गर्भपुष्टिकराय नमः ।
ॐ गर्भगौरवसाधनाय नमः ।
ॐ गर्भगर्वनुदे नमः ।
ॐ गरीयसे नमः ।
ॐ गर्वनुदे नमः । ९९०।
ॐ गर्वमर्दिने नमः ।
ॐ गरदमर्दकाय नमः ।
ॐ गरसंतापशमनाय नमः ।
ॐ गुरुराजसुखप्रदाय नमः ।
ॐ गर्भाश्रयाय नमः । ९९५।
ॐ गर्भमयाय नमः ।
ॐ गर्भामयनिवारकाय नमः ।
ॐ गर्भाधाराय नमः ।
ॐ गर्भधराय नमः ।
ॐ गर्भसन्तोषसाधकाय नमः । १०००।

॥इति श्री गणेश गकार
सहस्रनामावलिः संपूर्णम् ॥